# दिल्लीविश्वविद्यालयस्य

## संस्कृतविभागेन संस्कृतभारत्या च संयुक्ततया

## आयोज्यमानः

# संस्कृतदिवससमारोहः



**विशिष्टातिथयः**

**आचार्याः बृजेशकुमारपाण्डेयाः**
प्रतिकुलपतयः
जवाहरलालनेहरुविश्वविद्यालये



**मुख्यवक्तारः**

**आचार्याः चान्दकिरणसलूजाः**
अकादमिकनिदेशकाः
संस्कृतसंवर्द्धनप्रतिष्ठाने
(विशिष्टव्याख्यानकार्यक्रमः ०३:०० वादनतः)



**सारस्वतातिथयः**

**आचार्या रत्नाबल्यः**
अधिष्ठात्र्यः , शोधसङ्कायस्य
दिल्लीविश्वविद्यालये

## प्रतियोगिताः

(०९:३० वादनतः)

- **श्लोकोच्चारणप्रतियोगिता**
- **भाषणप्रतियोगिता**

**उभयत्र प्रथमद्वितीयतृतीयपुरस्काराः भविष्यन्ति पुरष्काराः सर्वेभ्योऽपि प्रतिभागिताप्रमाणपत्राणि च प्रदास्यन्ते।**

## संस्कृतवस्तुप्रदर्शिनी

**समय : १०:०० वादनतः**

## शोभा यात्रा

**समय : १२:०० वादनतः**

## सांस्कृतिककार्यक्रमाः

(०५:०० वादनतः)

- **सङ्गीतप्रस्तुतिः**
- **नाट्यप्रस्तुतिः**
- **नृत्यप्रस्तुतिः**

**दिनाङ्कः** २७/०८/२०२४
**समय :** प्रातः ०९:३० वादनतः सायं ०६ वादनपर्यन्तम्
**स्थानम् :** सत्यकामभवनस्य सभागारः

**इच्छुकाः छात्राः दत्ते गूगल-प्रपत्रे स्वनामपञ्जीकरणं कर्तुं शक्नुवन्ति**

https://forms.gle/73F2zqJ37nBwGNGa9


संपर्कसूत्रम्
आयुषः - 8210027602
अनिलः - 95606 65932


## निवेदकाः


**आचार्यः भारतेन्दुपाण्डेयः**
आचार्यः संस्कृतविभागे
दिल्लीविश्वविद्यालये

**आचार्यः ओमनाथः बिमली**
संस्कृतविभागाध्यक्षः
दिल्लीविश्वविद्यालये

**डॉ. देवकीनन्दनः**
प्रान्तमन्त्री
संस्कृतभारती, देहली

**डॉ. सौरभजी:**
उप-कुलानुशासकः
संस्कृतप्राध्यापकश्च
दिल्लीविश्वविद्यालये

# विज्ञप्तिः


## संस्कृतदिवससमारोहः

२७-०८-२०२४

### संस्कृतभाषणस्पर्धा

सम्मान्या महाविद्यालयानां प्राचार्या आचार्याश्च तत्रत्यसंस्कृतविभागानाम् !
तत्र भवतामिदमस्तु विदितमिह प्रोक्तायां तिथौ संस्कृतविभागो दिल्लीविश्वविद्यालयस्य द्वे स्पर्धे समायोजयतीति ।
तयोर्विवरणमधोलिखितमनुसरन्तः स्व-स्व संस्थातः प्रतिभागिदलमत्र प्रेषयन्त्विति विनिवेद्यते ।

ऑनलाइन पञ्जीकरणस्यलिंकः
https://docs.google.com/forms/u/0/d/1VOnmgOGqyLDAZQ9bsAiIsvgcyYFLlJoUQghZxr_dgXw/viewform?ts=66c2144f&edit_requested=true



# विवरणम्

## स्पर्धाः

### १.संस्कृतभाषणस्पर्धा

1. प्रत्येकं संस्थात एकमेव प्रतिभागिदलम नुमन्यते। तस्मिन् दले द्वौ प्रतिभागिनौ स्याताम् |

2. स्नातक-स्नातकोत्तरकक्षयोरेव विद्यार्थिनोऽत्र प्रतिभागितामर्हन्ति |

3. प्रत्येकं प्रतिभागिने ५+१ मिनटात्मक एव कालावधिर्भाषणाय देयः |

4. विजेतृभ्यः पुरस्काराः प्रदास्यन्ते | प्रमाणपत्रं नूनं भविष्यति सर्वप्रतिभागिसुलभम् |



# 2.श्लोकगानस्पर्धा

## आधारसामग्री -

1.चयनिताः श्लोकाः (Copy enclosed)
नियमः
2.प्रत्येकं संस्थात एकमेव प्रतिभागिदलमनुमन्यते। तस्मिन् दले द्वौ प्रतिभागिनौ स्याताम् |
3.स्नातक-स्नातकोत्तरकक्षयोरेव विद्यार्थिनऽअत्र प्रतिभागितामर्हन्ति।
4.प्रत्येकं प्रतिभागिने ३+१ मिनटात्मक एव कालावधिर्भाषणाय देयः |

## ध्यातव्यम् –

1.सर्वास्ववस्थासु निर्णायकानां निर्णय एवान्तिमत्वेन स्थास्यति |
2. लिखिता सामग्र्युभयोरपि स्पर्धयोरुपयोक्तुं नैवानुमन्यते|
3. गाने वाद्ययन्त्राणां प्रयोगोऽपि निषिद्धः |



# प्रतियोगितायै चयनिताः श्लोकाः

1. या सृष्टिः स्रष्टुराद्या, वहति विधिहुतं या हविर्या च होत्री,
ये द्वे कालं विधत्तः, श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम् |
यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः ||

2. सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति |
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम् ||

3. पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनानाSपि भवतां स्नेहेन या पल्लवम् |
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ||



4. शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृताऽपि रोषणतया मा स्म प्रतीपं गमः |
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ||

5. यदा किंचिज्ज्ञोहं द्विप इव मदान्धः समभवं
तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः |
यदा किंचित्किंचिद्बुधजनसकाशादवगतं
तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः ||

6. मणिः शाणोल्लीढः समरविजयी हेतिनिहतो
मदक्षीणो नागः शरदि सरिदाश्यानपुलिना |
कलाशेषश्चन्द्रः सुरतमृदिता बालवनिता
तनिम्ना शोभन्ते गलितविभवाश्चार्थिषु जनाः ||



7. पापान्निवारयति योजयते हिताय
गुह्यं च गूहति गुणान्प्रकटीकरोति |
आपद्गतं च न जहाति ददाति काले
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ||

8. धूमज्योतिः सलिलमरुतां सन्निपातः क्व मेघः
संदेशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः |
इत्यौत्सुक्यादपरिगणयन्गुह्यकस्तं ययाचे
कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ||

9.जातं वंशे भुवनविदिते पुष्करावर्तकानां
जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः |
तेनार्थित्वं त्वयि विधिवशाद्दूरबन्धुर्गतोऽहं
याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा ||

10.निर्मानमोहा जितसङ्गदोषा अध्यात्मनित्या विनिवृत्तकामाः |
द्वन्द्वैर्विमुक्ताः सुखदुःख संज्ञैर्गच्छन्त्यमूढाः पदमव्ययं तत् ||

